श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीरामदेशिकाचार्य विरचिता

# ॥ आकाशनगरीश प्रपत्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आकाशनगरीश प्रपत्तिः ॥

संकल्पकल्पलतिकामवधिं क्षमायाः
आकाशपुर्यधिपतेर्महिषीं दयार्द्राम्।
विश्वस्य मातरमकिञ्चनकामधेनुं
विश्वंभरामशरणः शरणं प्रपद्ये ॥ 1 ॥

श्रीमन्मृकण्डुजमहर्षितपोविपाकौ
भूम्याऽभिनन्दितमहाम्रदिमस्वभावौ।
आविष्टदुष्टशकटप्रकटोग्रभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये ॥ 2 ॥

शापोपसृष्टयमलार्जुनदृष्टलीलौ
पाषाणनिर्मिततपोधनधर्मदारौ।
दिव्यान्तरिक्षनगरीकृतसन्निधानौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये ॥ 3 ॥

स्वान्ते सतां श्रुतिषु यौ तमसश्च पारे
अहोरात्रपुष्करिणिकारमणीयतीरे ॥
देव्या भुवोऽङ्कभुवि सन्निहितौ सदा तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये ॥ 4 ॥

दुर्दान्तकालियफणाकृतदिव्यनृत्तौ
वेधःकमण्डलुजलैरभिषिक्तपूर्वौ।
गङ्गाङ्गसङ्गपरिपूतभवस्तुतौ तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये ॥ 5 ॥

त्रैविक्रमक्रमवशीकृतसप्तलोकौ
लोकेश्वरैरपि सदा कलितप्रणामौ।
नामावशेषितवदान्यबलिप्रभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **6**॥

सद्भक्तपाण्डवकृते कृतदूतकृत्यौ
बृन्दावनान्तरविहाररसप्रसक्तौ।
सर्वोपकारकरणाय कृतावतारौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **7**॥

श्रीमच्छठारिकलिवैरिमहत्सरोभिः
नाथागमान्तगुरुमुख्यगुरूत्तमैश्च।
संवाञ्छितातिशयितप्रियमङ्गलौ तौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **8**॥

भक्तप्रपन्नजनरक्षणबद्धदीक्षौ
नानाविधाघटितसङ्घटने समर्थौ।
अर्च्यौ प्रशस्ततुळसीकुसुमैरनन्यैः
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **9**॥

सङ्क्रन्दनादिसुरबृन्दसमर्प्यमाण -
मन्दारमाल्यविगलन्मकरन्दसान्द्रौ।
सारथ्यसूचितसदीड्यसुशीलभावौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **10**॥

विश्वातिशायिसुषमासुकुमारभावौ
वज्रध्वजाङ्कुशरथाङ्गमुखाङ्कदृश्यौ॥
दिव्याङ्गुलीनखमयूखविलिप्तपीठौ
भूवल्लभस्य चरणौ शरणं प्रपद्ये॥ **11**॥

संपद्दारिद्र्यभावादसुखसुखकृतेः पत्तनग्रामभावात्
पुण्यापुण्यादिभावात् कपटऋजुतया सर्वलोकादिभावात्।
दिव्यादिव्याङ्गवत्त्वात् सुरदितिजगणस्निग्धशत्रुत्वकीर्त्या
छायाऽच्छायादिभावादघटितघटनं प्राह कृष्णं शठारिः॥ **12** ॥

॥ इति आकाशनगरीश प्रपत्तिः समाप्ता ॥